National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(68): 71-75
© 2026 NJHSR
www.sanskritarticle.com

**तृषा पाल**
शोधच्छात्राः
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

.

**Correspondence:**
**तृषा पाल**
शोधच्छात्राः
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# स्त्रीचेतना तथा सामाजिकप्रतिबिम्बः गौरीधर्मपाल-रमाचौधुरीयोः तुलनात्मकमध्ययनम्

**तृषा पाल**

**सारांशः**

आधुनिकसंस्कृतसाहित्यं परम्परायाः संरक्षणेन सह नूतनचिन्तनस्य, सामाजिकजागरणस्य, मानवीयमूल्यानां च प्रकाशनस्य महत्त्वपूर्णं माध्यमं जातम्। आधुनिककाले संस्कृतभाषायां रचनां कुर्वत्यः महिला-लेखिकाः कवयश्च साहित्यस्य नूतनां दिशं प्रदर्शितवन्तः। तासां रचनासु नारीजीवनस्य विविधाः समस्याः, सामाजिकविषमता, स्त्रीस्वातन्त्र्यम्, आत्मसम्मानः, शिक्षायाः महत्त्वं, पारिवारिकजीवनस्य जटिलता च विविधरूपेण प्रतिफलिताः सन्ति। अस्मिन् शोधपत्रे आधुनिकसंस्कृतसाहित्यस्य प्रमुखे स्त्रीस्वरे गौरीधर्मपाल-महाभागायाः रमाचौधुरी-महाभागायाश्च योगदानं तुलनात्मकदृष्ट्या विविच्यते। उभयोः साहित्यसर्जनयोः नारीचेतनायाः स्वरूपं, सामाजिकजीवनस्य प्रतिबिम्बं, नारी-अस्मितायाः अन्वेषणं, शिक्षायाः सामाजिकभूमिका तथा परम्परा-आधुनिकतयोः संघर्षः विशेषतया परिशील्यते। उभे अपि लेखिके स्वकीयाभिः रचनाभिः नारीणां स्वतन्त्रव्यक्तित्वस्य, अधिकारस्य, आत्मसम्मानस्य च समर्थनं कुर्वतः। तथापि तयोः रचनाशैली, दृष्टिकोणः, विषयविन्यासश्च कतिपयेषु स्थलेषु परस्परं भिन्नः दृश्यते। अतः आधुनिकसंस्कृतसाहित्ये नारीचेतनायाः विकासं ज्ञातुं तयोः साहित्यस्य तुलनात्मकमध्ययनम् अत्यन्तमुपयोगि भवति।

**मुख्यशब्दाः**

आधुनिकसंस्कृतसाहित्यम्, स्त्रीचेतना, नारी-अस्मिता, सामाजिकप्रतिबिम्बम्, गौरीधर्मपालः, रमाचौधुरी, स्त्रीस्वातन्त्र्यम्।

## १. प्रस्तावना

संस्कृतसाहित्यस्य परम्परा अतीव प्राचीना समृद्धा च अस्ति। वेदेषु, उपनिषत्सु, रामायणे, महाभारते, पुराणेषु, काव्येषु, नाटकेषु च भारतीयजीवनस्य विविधाः पक्षाः सजीवत्वेन चित्रिताः सन्ति। संस्कृतसाहित्ये नारीणां स्थानमपि महत्त्वपूर्णम् आसीत्। वैदिककाले घोषा, लोपामुद्रा, अपाला, विश्ववारा इत्यादयः ऋषिकाः स्वकीयैः मन्त्रैः भारतीयज्ञानपरम्परायां विशिष्टं स्थानं प्राप्तवत्यः। कालपरिवर्तनस्य प्रभावेन समाजव्यवस्थायां परिवर्तनमभवत्। तेन सह नारीजीवनस्य स्वरूपेऽपि विविधाः परिवर्तनाः अभवन्। आधुनिककाले स्त्री केवलं परिवारस्य सदस्यरूपेण न, अपितु स्वतन्त्रचिन्तनशीलव्यक्तिरूपेणापि स्वस्य परिचयं स्थापयितुम् इच्छति। अतः आधुनिकसाहित्ये स्त्रीस्वरः अधिकं मुखरितः जातः। आधुनिकसंस्कृतसाहित्येऽपि अस्याः परिवर्तनशीलायाः चेतनायाः प्रभावः स्पष्टतया दृश्यते। आधुनिकाः संस्कृतलेखिकाः न केवलं प्राचीनपरम्परां वहन्ति, अपितु समकालीनसामाजिकजीवनस्य समस्याः अपि स्वकीयसाहित्ये अभिव्यञ्जयन्ति। अस्मिन् सन्दर्भे गौरीधर्मपाल-महाभागायाः रमाचौधुरी-महाभागायाश्च साहित्यिकं योगदानं विशेषतया उल्लेखनीयम्।

**२. आधुनिकसंस्कृतसाहित्ये स्त्रीचेतनायाः स्वरूपम्**

**'स्त्रीचेतना'** इति पदेन स्त्रियाः स्वकीयस्वरूपस्य, अधिकारस्य, कर्तव्यस्य, सामाजिकस्थानस्य, आत्मसम्मानस्य च विषये जागरूकता अभिप्रेता। स्त्रीचेतना केवलं स्त्रीस्वातन्त्र्यस्य घोषणामात्रं नास्ति, अपितु स्त्रियाः मानवीयव्यक्तित्वस्य पूर्णस्वीकृतिः अस्ति।
आधुनिकसंस्कृतसाहित्ये स्त्रीचेतना विभिन्नरूपेण दृश्यते। यथा—

1. स्त्रीशिक्षायाः समर्थनम्।
2. स्त्रीस्वावलम्बनस्य महत्त्वप्रतिपादनम्।
3. सामाजिकरूढीनां विरोधः।
4. स्त्री-अस्मितायाः अन्वेषणम्।
5. पारिवारिकजीवने स्त्रियाः भूमिकायाः पुनर्मूल्याङ्कनम्।
6. पुरुषप्रधानव्यवस्थायाः समीक्षणम्।
7. स्त्रीणां आत्मसम्मानस्य संरक्षणम्।
8. समानाधिकारस्य समर्थनम्।

अतः आधुनिकसंस्कृतसाहित्ये स्त्रीचेतना सामाजिकपरिवर्तनस्य सशक्तं साधनमपि भवति।

**३. गौरीधर्मपाल-महाभागायाः साहित्ये स्त्रीचेतना**

गौरीधर्मपाल-महाभागा आधुनिकसंस्कृतसाहित्ये विशिष्टस्थानं धारयति। सा केवलं संस्कृतसाहित्यस्य सर्जिका न, अपितु वैदिक-परम्परायाः, भारतीयसंस्कृतेः तथा नारीजीवनस्य सूक्ष्मनिरीक्षिका अपि अस्ति। तस्याः साहित्ये भारतीयपरम्परायाः आधुनिकचिन्तनस्य च सुन्दरः समन्वयः दृश्यते। गौरीधर्मपालस्य रचनासु नारी केवलं करुणायाः पात्रं न भवति। सा स्वकीयचिन्तनशक्त्या, विवेकबुद्ध्या, आत्मविश्वासेन च जीवनस्य समस्याः सम्मुखीकरोति। नारीणां शिक्षायाः, ज्ञानस्य, स्वाभिमानस्य च महत्त्वं तस्याः साहित्यदृष्ट्या विशेषतया प्रकाशते। तस्याः लेखने भारतीयसंस्कृतेः मूल्यानि नारीजीवनस्य आधुनिकसमस्याभिः सह सम्बद्धानि भवन्ति। सा परम्परायाः अन्धानुकरणं न करोति, अपितु परम्परायाः सकारात्मकमूल्यानां संरक्षणं कुर्वती आधुनिकजीवनस्य आवश्यक-तानुसारं नूतनदृष्टिकोणं स्थापयति। गौरीधर्मपालस्य साहित्ये नारीशक्तिः ज्ञानस्य तथा आत्मचेतनायाः आधारेण प्रतिष्ठाप्यते। तस्याः नारी न केवलं अधिकारान् याचते, अपितु स्वकीयक्षमतया तान् प्राप्तुम् अपि प्रयतते।

➢ **गौरीधर्मपालस्य रचनासु स्त्रीचेतना**

स्त्रीचेतना आधुनिकसाहित्यस्य महत्त्वपूर्णः विषयः अस्ति। समाजे नारीणां स्थानम्, अधिकारः, आत्मपरिचयः तथा संघर्षः एते विषयाः साहित्यिकानां चिन्तने विशेषमहत्त्वं प्राप्तवन्तः। गौरीधर्मपालस्य रचनासु एषा स्त्रीचेतना विशिष्टं स्वरूपं प्राप्नोति, यत्र प्राचीनमूल्यबोधस्य आधुनिकदृष्टिकोणस्य च समन्वयः दृश्यते। सर्वधर्मसमन्वयभावनया सा स्वकीयायां **'जननी'** - नाटिकायां कथयति—

**"मनुष्यमाता भूमिकन्याः वयं पृथिव्याः इति।"**[1]

अर्थात् पृथिवी मम माता, वयं तस्याः सन्तानाः। माता सर्वदा सर्वत्र विद्यमाना भवति। किन्तु मनुष्यः बहुधा स्वकीयकर्तव्यं विस्मृत्य मातरम् उपेक्षते। तदा माता इव पृच्छति—"किं भविष्यति? मम किमपि प्रयोजनं नास्ति किम्?" वस्तुतः सैव अस्मभ्यं सर्वं प्रयच्छति अन्नं, वस्त्रं, शिक्षां, जीवनधारणस्य साधनानि च। सा अस्माकं सर्वाणि दुःखानि कष्टानि च सहते, अस्मान् वर्धयति, आनन्दस्य दुःखस्य, ज्ञानस्य विज्ञानस्य च मूलस्रोतः भवति। सर्वदा अस्माकं समीपे स्थित्वापि यदि वयमेव ताम् उपेक्षेमहि, तर्हि किं तस्याः विना सुखेन जीवितुं शक्यते? यदा मातरं विजित्य वा ताम् उपेक्ष्य वा वयं स्वार्थसाधनं कुर्मः, तदा सर्वमेव निरर्थकं भवति—इत्येव कवयित्री बोधयितुम् इच्छति।

➢ **स्त्रीणाम् आत्मत्यागः तथा सामाजिकवञ्चना**

गौरीधर्मपालस्य नाट्यकृतौ **'जननी'** इत्यत्र स्त्रीचेतनायाः सजीवं प्रतिबिम्बं दृश्यते। 'जननी' इति पात्रं संसारस्य मूलाधाररूपेण वर्तते। सा परिवारस्य सर्वाणि उत्तरदायित्वानि निर्वहति, किन्तु तद्विनिमयेन यथोचितं सम्मानं वा स्वीकृतिं वा न प्राप्नोति। तस्याः मौनत्यागस्य उपेक्षायाश्च माध्यमेन समाजे नारीणां वास्तविकस्थितिः स्पष्टतया प्रकाशिता भवति। अत्र नारी एकतः सहनशीलतायाः प्रतीकरूपेण चित्रिता अस्ति, अपरतः तस्याः योगदानस्य प्रति समाजस्य उदासीनता अपि तीव्रतया चिह्निता अस्ति।

➢ **रमाचौधुर्याः परिचयः तथा साहित्यकृतयः**

आधुनिकसंस्कृतसाहित्ये रमाचौधुर्याः योगदानम् अनस्वीकरणीयम् अस्ति। १९११ ख्रीष्टाब्दस्य फेब्रुवरी-मासस्य अष्टम्यां तिथौ कोलकातानगरे तस्याः जन्म अभवत्। तस्याः पिता प्रसिद्धः बैरिस्टर् शुद्धांशुमोहनबसुः आसीत्। बङ्गदेशस्य प्रथमगणितज्ञरूपेण तस्याः पितामहः श्रीमान् आनन्दमोहनबसुः सुप्रसिद्धः आसीत्। तस्याः पूर्वजाः तु बङ्गदेशस्य मयमनसिंहजनपदस्य जयसिद्धी इति नामके स्थले निवसन्ति स्म। रमादेवी १९२७ ख्रीष्टाब्दे ब्राह्मबालिकाविद्यालयात् मेट्रिक्-परीक्षायां प्रथमस्थानं प्राप्य छात्रासु विशिष्टस्थानं प्राप्तवती। ततः सा स्कॉटिश् चर्च् महाविद्यालये तथा कलकत्ताविश्वविद्यालये दर्शनशास्त्रे प्रथमश्रेण्यां प्रथमस्थानं प्राप्तवती। सा प्रथमबङ्गाली-महिलारूपेण स्कॉटिश् चर्च् महाविद्यालयात् डी.फिल् उपाधिं प्राप्तवती। ततः ऑक्सफोर्डविश्वविद्यालयात् प्रथममहिलारूपेण Ph.D. उपाधिं प्राप्तुं गौरवं प्राप्तवती।

१९३९ ख्रीष्टाब्दे लेडी ब्रेबोर्न् महाविद्यालये रमादेवी अध्यापिकापदेन नियुक्ता अभवत्। अष्टादशवर्षाणां अध्यापनानन्तरं तस्यामेव संस्थायां सा प्राचार्यपदं प्राप्तवती। अनन्तरं सा रवीन्द्रभारतीविश्वविद्यालयस्य कुलपतिपदं तथा Royal Asiatic Society of Bengal इत्यस्य प्रथममहिलाफेलो-पदं च अलङ्कृतवती। डॉ. रमाचौधुरी All India Fine Arts Association इत्यस्य संस्थापिका तथा सभानेत्री च आसीत्। रमादेवी बाङ्ग्ला-अङ्ग्ल-संस्कृतभाषासु प्रायः षड्विंशतिः ग्रन्थान् अरचयत्। तस्याः विंशत्यधिकानि संस्कृतनाटकानि सन्ति। तेषु मनीषिणां जीवनचरिताधारितानि,पौराणिकविषयकानि, समकालीन-

समाजे नारीणां स्थितिम् आधारीकृतानि तथा मानवजीवनकेन्द्रितानि नाटकानि प्रमुखानि सन्ति।

**➢रमाचौधुर्याः रचनासु स्त्रीचेतना**

आधुनिकसंस्कृतसाहित्ये महिलासाहित्यकाराणां साहित्यसाधनायां रमाचौधुर्याः योगदानं विशेषतया उल्लेखनीयम् अस्ति। सा केवलम् एका शिक्षाविदुषी न, अपितु कुशला साहित्यकारा अपि आसीत्। स्वकीयाभिः साहित्यकृतिभिः सा आधुनिकसंस्कृतसाहित्यं समृद्धवती। तस्याः रचनासु नारीचेतना, आत्मसम्मानः, ज्ञानचिन्तनम् तथा सामाजिकचेतना स्पष्टतया प्रतिबिम्बितानि सन्ति। रमाचौधुर्याः साहित्यकृतिषु नारी दुर्बला वा गृहबद्धा सत्ता इति न प्रदर्शिता, अपितु ज्ञानस्य, कर्मणः, सृजनशीलतायाश्च अधिकारिणीरूपेण उपस्थापिता अस्ति। तस्याः रचनासु नारी आत्मप्रतिष्ठायै संघर्षं करोति तथा समाजस्य प्रचलितसंकीर्णतायाः विरुद्धं स्वकीयस्थानं दृढतया स्थापयितुं प्रयतते। तस्याः नाटकेषु **'शङ्करशङ्करम्', 'कविकुल-कोकिलम्', 'पल्लीकमलम्'** इत्यादीनि उल्लेखनीयानि सन्ति। एतेषु नाटकेषु परम्परायाः आधुनिकतायाश्च समन्वयेन मानवीयमूल्यानि, समाजसंस्कारः तथा व्यक्तिस्वातन्त्र्यस्य स्वरूपं प्रकाशते। विशेषतः **'कविकुलकोकिलम्'** इति नाटके कालिदासस्य जीवनकथामाध्यमेन ज्ञानस्य, प्रेम्णः तथा आत्मोन्नतेः विषयः उपस्थापितः अस्ति। अत्र नारीपात्रं केवलं सहायकं न, अपितु कथायाः महत्त्वपूर्णं प्रेरकत्वं वहति। पुनश्च **'पल्लीकमलम्'** इति नाटके ग्राम्यबालिकाकेन्द्रितकथायाः माध्यमेन लोकजीवनस्य तथा मानवीयसम्बन्धानां चित्रणं कृतम् अस्ति। अत्र नारीणाम् आवेगः, अनुभूतयः तथा सामाजिकयथार्थता प्रकाशन्ते। तस्याः रचनासु नारी केवलं पारिवारिकदायित्वेषु बद्धा नास्ति, अपितु समाजस्य संस्कृतेश्च सक्रियभागिनी अस्ति।

रमाचौधुर्याः साहित्यभाषा सरल, सरला, प्रवाहमयी तथा नाटकीयगुणसमन्विता च अस्ति। भारतीयपरम्परायाः आधारभूमौ स्थित्वा सा आधुनिकचिन्तनधारायाः अभिव्यक्तिं कृतवती। तस्याः साहित्यकृतिषु नारीचेतना आत्मसम्मानस्य, शिक्षायाः महत्त्वस्य तथा स्वतन्त्रमानसिकतायाः माध्यमेन विशेषमहत्त्वं प्राप्नोति। समग्रतया वक्तुं शक्यते यत् रमाचौधुर्याः रचनासु स्त्रीचेतना केवलं व्यक्तिगतभावनानां प्रकाशनं नास्ति, अपितु समाजे स्त्रीणां स्वतन्त्रपरिचयस्य तथा गौरवपूर्णस्थानस्य प्रतिष्ठापनस्य साहित्यिकः प्रयासः अस्ति।

**➢तस्याः प्रमुखाः स्त्रीविषयकाः नाट्यकृतयः**

**१. निवेदितानिवेदितम्**

मार्गरेट् नोबेल् इति नाम्ना प्रसिद्धायाः भगिन्याः निवेदितायाः चरित्रस्य प्रमुखविशेषतान् तथा भारतीयसमाजाय तस्याः महत्त्वपूर्णं योगदानम् आधारीकृत्य १९७९ ख्रीष्टाब्दे द्वादशदृश्ययुक्तं नाटकमिदं रमाचौधुर्या विरचितम्। नाटकस्य नान्द्यां निवेदिता विविधैः विशेषणैः विभूषिता अस्ति। यथा—**रुद्राक्षमालाधारिणी, विवेकचरणवन्दिनी, लक्ष्यपालिनी** इत्यादि। नाटकस्य चतुर्थदृश्ये स्वामी विवेकानन्दः निवेदिताम् जगत्सेवायाम् आत्मनियोजनाय आह्वयति—

**"हे महाप्राण, उत्तिष्ठ जागरुकाः भव; जगत् सम्प्रति यन्त्रणापीडितम्। अधुना किं तव निद्रा शोभते?"[2]**

संवादयोजनायां पात्रचित्रणे च कवयित्री रमाचौधुरी असाधारणं कौशलं प्रदर्शितवती। प्रमुखेषु गौणेषु च पात्रेषु वीरकरुणशान्तरसानां यत् सुन्दरं संयोजनं कृतम्, तत् पाठकानां मनः विशेषतया आकर्षति। एवं सम्पूर्णे नाटके भारतभूमेः प्रति निवेदितायाः आत्मनिवेदनस्य महती गाथा वर्णिता अस्ति।

**२. रसमयरासमणिः**

बङ्गदेशस्य गौरवशालिनीषु नारीषु राणी रासमणिः प्रमुखस्थानं धारयति। तस्याः जन्म १७९३ ख्रीष्टाब्दे हालिशहरस्य समीपे त्रिवेणीनिकटस्थे कोनाग्रामे अभवत्। तस्याः पिता हरेकृष्णदासः कैवर्तजातीयः कृषकः आसीत्। असाधारणसौन्दर्यसम्पन्ना रासमणिः निर्धने गृहे जाता सती अपि कोलकातानगरस्य अत्यन्तधनिनः प्रीतिराममाडस्य द्वितीयपुत्रेण राजचन्द्रेण सह विवाहितवती। सा असाधारणबुद्धिमती दूरदर्शिनी च आसीत्। राजचन्द्रस्य मृत्योः अनन्तरं सा विशालसम्पत्तेः अत्यन्तकुशलतया संरक्षणं कृतवती। तत्कालीनाङ्ग्लशासनेन सह तस्याः अनेकवारं संघर्षः अभवत्, किन्तु प्रत्येकस्मिन् प्रसङ्गे तस्याः तीक्ष्णकूटनीतिबुद्धेः समक्षं ते पृष्ठतः अपसृताः। प्रखरव्यवहारकुशलतया सा स्वसम्पत्तेः बहुगुणितां वृद्धिं कृतवती। दक्षिणेश्वरे कालीमन्दिरस्य स्थापना तस्याः अमरं कीर्तिचिह्नम् अस्ति। १८६१ ख्रीष्टाब्दे राणी रासमण्याः निधनम् अभवत्। अस्मिन् नाटके तस्याः महनीयायाः महिलायाः बुद्धिमत्ता, दूरदर्शिता, दयादाक्षिण्यम्, ईश्वरभक्तिः इत्यादीनां गुणानां सम्यक् प्रकाशनं कृतम् अस्ति।

**३. पल्लीकमलम्**

लोकप्रसिद्धां कथाम् आधारीकृत्य नवाङ्कयुक्तं नाटकमिदं रचितम् अस्ति। नाटके कमलकालीका-रूपकुमारयोः प्रेमकथा नाटकीयतां प्राप्नोति। उभयोः प्रेमस्य पराकाष्ठा अन्ते विवाहपरिणतिं प्राप्नोति। नाटके लोकप्रचलितोक्तीनां संस्कृतानुवादः अपि दृश्यते, यथा—

**"आकाशचन्द्रः पतितः करे मे।**
**कुक्षौ क्षुधा मुखे लज्जा।**
**पथि ठक्कुराद्रियमानो**
**मस्तकमारोहतीति।"[3]**

नाटकीयशैल्या पुनः नाटकस्य पञ्चमाङ्के कमलकमिकायां विष्णुभक्तेः भावना जागरिता भवति। सरल-सुबोधया भाषया विरचितेऽस्मिन् नाटके कवयित्री अभिनवप्रयोगं कर्तुं विशेषतया न प्रयतते। नाटकीयवर्णने सङ्गीतस्य विशेषसंयोजनमपि न दृश्यते। चलच्चित्रस्य इव नाटकीयशैल्या दृश्यानां पूर्वकं पटलपरिवर्तनं भवति

**४. रमाचौधुरी-महाभागायाः साहित्ये स्त्री-अस्मिता**

रमाचौधुरी-महाभागा आधुनिकसंस्कृतसाहित्ये स्वकीयया विशिष्टया रचनापद्धत्या महत्त्वपूर्णं स्थानं प्राप्तवती। तस्याः साहित्ये नारीजीवनस्य भावनात्मकः, सामाजिकः तथा मनोवैज्ञानिकः पक्षः

प्रभावशालीरूपेण दृश्यते। रमाचौधुरी नारीजीवनस्य अन्तर्वेदनां, संघर्षं, आकाङ्क्षां तथा आत्मसम्मानस्य चेतनां साहित्यिकरूपेण प्रस्तुतयति। तस्याः दृष्टौ नारी केवलं परिवारस्य उत्तरदायित्वं वहन्ती व्यक्तिः न, अपितु स्वतन्त्रचिन्तनशीलं व्यक्तित्वम् अस्ति। तस्याः रचनासु पारिवारिकसम्बन्धानां जटिलता, सामाजिकप्रतिबन्धाः, स्त्रीजीवनस्य मानसिकद्वन्द्वं तथा आत्मपरिचयस्य समस्या विशेषतया परिलक्ष्यते। नारी स्वकीयजीवनस्य निर्णयेषु कियत् स्वतन्त्रतां प्राप्नोति—इति प्रश्नः तस्याः साहित्ये महत्त्वपूर्णतया उपस्थितः भवति। रमाचौधुर्याः नारीपात्रेषु आत्मसम्मानस्य भावना विशेषतया दृश्यते। तस्याः नारी अन्यायस्य समक्षे मौनं न भवति, अपितु स्वकीयस्वरं प्रकटयति। अनेन प्रकारेण तस्याः साहित्ये स्त्री-अस्मिता सामाजिक-चेतनायाः रूपं धारयति।

**५. उभयोः लेखिकयोः साहित्ये सामाजिकप्रतिबिम्बम्**

साहित्यं समाजस्य दर्पण इति सामान्यतः स्वीक्रियते। लेखकस्य वा लेखिकायाः दृष्ट्या समाजस्य यत् स्वरूपं अनुभूयते, तत् साहित्ये प्रतिबिम्बितं भवति। गौरीधर्मपाल-रमाचौधुरीयोः साहित्येऽपि समकालीनभारतीयसमाजस्य विविधाः पक्षाः प्रतिबिम्बिताः सन्ति। उभयोः रचनासु नारीजीवनस्य सामाजिकस्थितिः, शिक्षायाः आवश्यकता, पारिवारिकसम्बन्धानां स्वरूपम्, रूढीनां प्रभावः, आधुनिकमूल्यानां प्रवेशः तथा व्यक्तिस्वातन्त्र्यस्य आकाङ्क्षा इत्यादयः विषयाः दृश्यन्ते। गौरीधर्मपालस्य दृष्टिकोणः अधिकतया भारतीय-संस्कृतिपरम्परायाः आधारभूमौ स्थित्वा आधुनिकनारीचेतनां व्याख्याति। तस्याः साहित्ये वैदिकज्ञानपरम्परायाः तथा आधुनिकजीवनमूल्यानां मध्ये सामञ्जस्यस्य प्रयासः दृश्यते। रमाचौधुर्याः दृष्टिकोणः नारीजीवनस्य सामाजिक-मनोवैज्ञानिका-नुभवानां समीपे अधिकं दृश्यते। सा नारीमनसः सूक्ष्मानुभूतीः सामाजिकपरिवेशेन सह सम्बध्नाति।

**६. तुलनात्मकमध्ययनम्**

गौरीधर्मपाल - रमाचौधुरीयोः साहित्ययोः तुलनात्मकमध्ययने कतिपयाः समानताः भिन्नताश्च स्पष्टतया अवगन्तुं शक्यन्ते।

**६.१ समानताः**

**प्रथमम्,** उभे अपि लेखिके नारीणां गरिमायाः समर्थनं कुरुतः।

**द्वितीयम्,** स्त्रीशिक्षायाः महत्त्वं तयोः चिन्तने प्रमुखम् अस्ति।

**तृतीयम्,** उभयोः साहित्ये नारी स्वकीयव्यक्तित्वस्य अन्वेषणं करोति।

**चतुर्थम्,** सामाजिकरूढीनां तथा अन्यायपूर्णव्यवस्थानां प्रति प्रश्नाकुलता दृश्यते।

**पञ्चमम्,** उभे अपि आधुनिकनारीं स्वावलम्बिनीं, जागरूकां, आत्मसम्मानसम्पन्नां च द्रष्टुम् इच्छतः।

**६.२ भिन्नताः**

गौरीधर्मपालस्य साहित्यदृष्टिः भारतीयवैदिक-सांस्कृतिकपरम्परया अधिकं सम्बद्धा दृश्यते। तस्याः रचनासु नारीशक्तेः मूलं ज्ञानपरम्परायां तथा सांस्कृतिकमूल्येषु अन्विष्यते। तद्विपरीतं रमाचौधुर्याः साहित्ये नारीजीवनस्य व्यक्तिगतः तथा सामाजिकः संघर्षः अधिकं प्रमुखतां प्राप्नोति। तस्याः रचनासु नारीमनसः भावात्मकः पक्षः, सामाजिकदबावः तथा आत्मपरिचयस्य प्रश्नः विशेषतया प्रकाशते। एवं दृष्ट्या उभयोः साहित्यदृष्ट्योः लक्ष्यं नारीगरिमायाः प्रतिष्ठापनमेव, किन्तु तयोः अभिव्यक्तिमार्गौ भिन्नौ स्तः।

**७. नारीशिक्षा तथा स्वावलम्बनम्**

नारीशिक्षा आधुनिकनारीचेतनायाः मूलाधारः अस्ति। शिक्षया नारी केवलं ज्ञानं न प्राप्नोति, अपितु स्वकीयाधिकारान्, कर्तव्यांश्च ज्ञातुं समर्था भवति। अतः आधुनिकसंस्कृतसाहित्ये नारीशिक्षायाः विषयः महत्त्वपूर्णः अस्ति। गौरीधर्मपालस्य चिन्तने ज्ञानं नारीशक्तेः प्रमुखं साधनम्। वैदिकपरम्परायां स्त्रीणां विद्यासम्पन्नत्वस्य यत् उदाहरणं दृश्यते, तत् आधुनिकनारीजीवनस्य प्रेरणास्रोतत्वेन सा स्वीकरोति। रमाचौधुर्याः साहित्येऽपि शिक्षायाः माध्यमेन नारीणां आत्मविश्वासस्य विकासः सम्भाव्यते। शिक्षा नारीं सामाजिकनिर्णयेषु सक्रियां करोति तथा तस्याः आत्मपरिचयं दृढं करोति। अतः उभयोः लेखिकयोः दृष्ट्या नारीशिक्षा केवलं व्यक्तिगतविकासस्य साधनं न, अपितु सामाजिक-परिवर्तनस्य आधारः अपि अस्ति।

**८. परम्परा तथा आधुनिकता**

आधुनिकसंस्कृतसाहित्यस्य एकः प्रमुखः विषयः परम्परा-आधुनिकतयोः सम्बन्धः अस्ति। आधुनिकता परम्परायाः पूर्णनिषेधं न सूचयति। अपितु यानि परम्परागतमूल्यानि मानवकल्याणाय उपयोगीनि सन्ति, तेषां संरक्षणं तथा यानि रूढिरूपेण मानवस्वातन्त्र्यं बाधन्ते तेषां परित्यागः—इत्येव आधुनिकदृष्टेः सारः। गौरीधर्मपालस्य साहित्ये परम्परा आधुनिकतया सह संवादं करोति। सा भारतीयसंस्कृतेः सकारात्मकमूल्यानि स्वीकृत्य आधुनिकनारीणां अधिकारचेतनां प्रतिष्ठापयति। रमाचौधुर्याः साहित्ये आधुनिकनारी स्वकीयपरम्परागतभूमिकां पुनर्विचारयति। सा परम्परायाः मूल्यं स्वीकरोति, किन्तु तस्याः नाम्ना स्त्रीस्वातन्त्र्यस्य दमनं नाङ्गीकरोति। अतः उभयोः साहित्ये परम्परा न स्थिरा, अपितु परिवर्तनशील-जीवनस्य सहचरीरूपेण दृश्यते।

**९. सामाजिकपरिवर्तनस्य सन्दर्भे तयोः योगदानम्**

साहित्यस्य प्रयोजनं केवलं मनोरञ्जनं न भवति। साहित्यं समाजस्य चिन्तनप्रक्रियायाः परिवर्तनमपि जनयितुं शक्नोति। गौरीधर्मपाल-रमाचौधुरीयोः साहित्यं नारीजीवनस्य समस्याः प्रकाश्य समाजं चिन्तयितुं प्रेरयति। तयोः रचनासु नारीविषयकप्रश्नाः केवलं व्यक्तिगतदुःखरूपेण न प्रस्तुताः, अपितु व्यापकसामाजिकव्यवस्थायाः अङ्गरूपेण विवेचिताः। अतः तयोः साहित्यं सामाजिकचेतना-विकासस्य साधनं भवति। नारीणां प्रति सम्मानः, समानता, शिक्षा, आत्मनिर्भरता तथा आत्मसम्मानः—एतेषां मूल्याणां प्रतिष्ठापने तयोः साहित्यिकयोगदानं महत्त्वपूर्णम् अस्ति।

**१०. उपसंहारः**

आधुनिकसंस्कृतसाहित्ये स्त्रीचेतनायाः विकासः साहित्यिकपरिवर्तनस्य महत्त्वपूर्णः अध्यायः अस्ति। गौरीधर्मपाल-रमाचौधुरी इत्येतयोः साहित्यिकयोगदानं अस्मिन् सन्दर्भे विशेषतया उल्लेखनीयम्।

गौरीधर्मपाल - महाभागा भारतीयवैदिक - सांस्कृतिकपरम्परायाः आधारभूमौ स्थित्वा आधुनिकनारीचेतनां व्याख्याति। तस्याः साहित्ये ज्ञानम्, शिक्षा, आत्मसम्मानः, सांस्कृतिकमूल्यं तथा नारीशक्तिः प्रमुखतया प्रकाशन्ते। रमाचौधुरी-महाभागा तु नारीजीवनस्य सामाजिक-मनोवैज्ञानिकानुभवान् केन्द्रे स्थापयित्वा स्त्री-अस्मितायाः प्रश्नं उद्घाटयति। तस्याः साहित्ये नारी स्वकीयजीवनस्य निर्णयेषु सक्रियां स्वतन्त्रां च भूमिकां प्राप्तुम् इच्छति। तुलनात्मकदृष्ट्या अवलोकने उभयोः साहित्ये नारीगरिमायाः प्रतिष्ठापनम्, स्त्रीशिक्षायाः समर्थनम्, आत्मसम्मानस्य संरक्षणम्, सामाजिकरूढीनां समीक्षणं च समानतया दृश्यते। भिन्नता तु तयोः अभिव्यक्तिदृष्टौ तथा सांस्कृतिक-समाजिकसन्दर्भेषु दृश्यते।

अतः **निष्कर्षरूपेण** वक्तुं शक्यते यत् गौरीधर्मपाल-रमाचौधुरीयोः साहित्यं आधुनिकसंस्कृतसाहित्ये नारीचेतनायाः सशक्तं प्रतिनिधित्वं करोति। तयोः रचनाः न केवलं संस्कृतसाहित्यस्य श्रीवृद्धिं कुर्वन्ति, अपितु समकालीनसमाजे नारीणां सम्मानपूर्णस्थानस्य निर्माणाय अपि प्रेरणां ददति। तयोः साहित्यिकयोगदानस्य सम्यगध्ययनं आधुनिक-संस्कृतसाहित्यस्य नूतनदिशां तथा भारतीयनारीचेतनायाः विकास-प्रक्रियां च अवगन्तुं नितराम् उपकरोति।

**सन्दर्भग्रन्थाः**


१. **अमरकोशः** — अमरसिंह प्रणीतः, गुरुणा विद्यनिधि-भट्टाचार्येण सम्पादितः, संस्कृत-पुस्तक-भाण्डारः।

२. **धर्मपाल, रोहिणी; वसु, वाणी।** गौरीधर्मपालसमग्रः, प्रथमः खण्डः। लालमाटी-प्रकाशनम्।

३. **जाना , सुनीलकुमारः।** आधुनिकसंस्कृतसाहित्ये कवयित्रीप्रतिभा। कोलकाता — संस्कृत-बुक-डिपो।

४. **मुखोपाध्याय, अञ्जलिका।** आधुनिकसंस्कृतकाव्यचर्चाय बाङाली, सेकाल ओ एकाल। संस्कृत-पुस्तक-भाण्डारः।

५. **धर्मपाल, गौरी।** पुरोनूतनवेदेर कविता। ऋतम्।

६. **मिश्र, सुधाकरः।** आधुनिकसंस्कृतम्। द बनारस मर्केण्टाइल् कम्पनी।

७. **धर्मपाल, गौरी।** *पुरोनूतनवैदिकविवाहः*। प्रेसिडेन्सी-लाइब्रेरी।

८.**सेन, शुभ्रजीत्।** भारतवर्षे आधुनिकसंस्कृतसाहित्यम् — विहङ्गम-दृष्ट्या परिशीलनम्। संस्कृत-पुस्तक-भाण्डारः।

९.**भौमिक,जीह्लवीचरणः**।संस्कृतसाहित्येर इतिहासः(वैदिक लौकिक)। संस्कृत-पुस्तक-भाण्डारः।

१०.**शास्त्री, गौरीनाथः**। संस्कृतसाहित्येर इतिहासः। सारस्वत-लाइब्रेरी, कोलकाता।

११. **Sukla, H. L** Modern Sanskrit Literature, संस्कृतविद्यायाः पुनरुज्जीवनम्। New Bharatiya Book Corporation, New Delhi.

१२.**Banerji Chandra Sures**, Sanskrit Culture Of Bengal, Sharada Publishing House,40 Ananda Nagar, Inderlok, Delhi

१३.**Swain Prof. Brajakishore**, Sanskrit An Introductory Analysis, Akshaya Prakashan, Delhi


**पाद टिप्पणी**

[1] जननी, पृ. २१।

[2] वङ्गे आधुनिक संस्कृत साहित्य पृ-१५४

[3] आधुनिकसंस्कृतसाहित्ये कवयित्रीप्रतिभा पृ-९३